## पञ्चमः पाठः

# सर्वदमनः भरतः

कालिदासः सर्वश्रेष्ठः कविः वर्तते। अस्य उपमा सर्वोत्तमा वर्तते। रघुवंशं, कुमारसम्भवमिति द्वे महाकाव्ये ऋतुसंहारं मेघदूतमिति खण्डकाव्यद्वयं, विक्रमोर्वशीय-मालविकाग्निमित्र-अभिज्ञानशाकुन्तलानीति त्रीणि नाटकानि कालिदासकृतयः प्रथन्ते। तत्र अभिज्ञानशाकुन्तलं नाटकं सर्वश्रेष्ठमिति विख्यातमस्ति। तस्मात् नाटकात् उद्धृतोऽयं पाठ्यभागः।



**(ततः प्रविशति तापसीभ्यां सह बालः)**

**बालः** – जृम्भस्व रे सिंहशावक! जृम्भस्व, दन्तान् ते गणयिष्यामि।

**प्रथमा** – अविनीत! किं नु अपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि। हन्त! वर्धत इव ते संरम्भः। स्थाने खलु ऋषिजनेन 'सर्वदमन' इति कृतनामधेयोऽसि।

**राजा** – किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे हृदयम्। (विचिन्त्य) नूनमनपत्यता मां वत्सलयति।

**द्वितीया** – एषा त्वां केशरिणी लङ्घयिष्यति, यद्यस्याः पुत्रकं न मोक्ष्यसि।

**बालः** – (सस्मितम्) अहो! बलीयः खलु भीतोऽस्मि। (इत्यधरं दर्शयति)

**राजा** – (सविस्मयम्) –

**महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।**
**स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः॥**

**प्रथमा** – वत्स! मुञ्च बालमृगेन्द्रकम्, अपरं ते क्रीडनकं दास्यामि।

**बालः** – कुत्र! देहि तत्। (इति हस्तं प्रसारयति)

**राजा** – (बालस्य हस्तं दृष्ट्वा) कथं चक्रवर्त्तिलक्षणमप्यनेन धार्यते ?

**द्वितीया** – सुव्रते! मुञ्चैनं नैष शक्यो वाङ्मात्रेण शमयितुम्। तद् गच्छ मदीये उटजे सङ्कोचनस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति, तमस्योपहर।

**प्रथमा** – तथा। (इति निष्क्रान्ता)

**बालः** – तावदनेनैव क्रीडिष्यामि। (इति तापसीं विलोक्य हसति)

**राजा** – स्पृह्यामि खलु दुर्ललितायास्मै। (निःश्वस्य)

**आलक्ष्यदन्तमुकुलाननिमित्तहासै —**
**रव्यक्तवर्णरमणीयवचः प्रवृत्तीन्।**
**अङ्काश्रयप्रणयिनस्तनयान् वहन्तो**
**धन्यास्तदङ्गरजसा कलुषी भवन्ति॥**

**तापसी –** (साङ्गुलितर्जनम्) भोः! न मां गणयसि। (पार्श्वमवलोक्य) कोऽत्र ऋषिकुमाराणाम् (राजानं दृष्ट्वा) भद्रमुख! एहि तावन्मोचय अनेन दुर्मोक्षहस्तग्रहेण डिम्भकेन बाध्यमानं बालमृगेन्द्रम्।

**राजा –** तथा (इत्युपगम्य सस्मितम्)

**अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रे सुखिता ममैवम्।**
**कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः प्रसूतः॥**

**तापसी –** (उभौ निर्वर्ण्य) आश्चर्यमाश्चर्यम्।

**राजा –** आर्ये! किमिव?

**तापसी –** अस्य बालकस्य असम्बद्धेऽपि भद्रमुखे संवादिनी आकृतिरिति विस्मितास्मि। अपि च वामशीलोऽपि भूत्वा अपरिचितस्यापि ते वचनेन प्रकृतिस्थः संवृत्तः।

**राजा –** (बालकमुपलालयन्) आर्य! न चेन्मुनिकुमारोऽयम्, तत् कोऽस्य व्यपदेशः?

**तापसी –** पौरव इति।

**राजा –** (स्वगतम्) कथमेकान्वयोऽयमस्माकम्।

**तापसी –** (प्रविश्य मयूरहस्ता) सर्वदमन! शकुन्तलावण्यं प्रेक्षस्व।

**बालः –** (सदृष्टिक्षेपम्) कुत्र वा मम माता ?

**उभे –** नामसादृश्येन वञ्चितो मातृवत्सलः।

**द्वितीया –** वत्स अस्य मृत्तिकामयूरस्य रम्यत्वम् पश्येति भणितोऽसि।

**राजा –** (आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या। सन्ति पुनर्नामधेयसादृश्यानि।

**बालः –** मातः रोचते मे एष भद्रमयूरः। (इति क्रीडनकमादत्ते)

**प्रथमा –** (विलोक्य सोद्वेगम्) अहो रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।

**राजा –** अलमलमावेगेन। नन्विदमस्य सिंहशावविमर्दात्परिभ्रष्टम्। (इत्यादातुमिच्छति)

**उभे–** (मा खल्विदमवलम्ब्य। कथं गृहीतमनेन?)

**राजा–** किमर्थं प्रतिषिद्धाः स्मः?

**प्रथमा –** श्रृणोतु महाराजः! एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वापरो भूमिपतितां न गृह्णाति।

**राजा –** अथ गृह्णाति?

**प्रथमा –** ततस्तं सर्पो भूत्वा दशति।

**राजा –** (सहर्षम् आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि। (इति बालं परिष्वजते)

(ततः प्रविशत्येकवेणीधरा शकुन्तला)

**राजा –** (शकुन्तलां विलोक्य) अये सेयमत्रभवती शकुन्तला।

**बालः –** (मातरमुपेत्य) मातः एष कोऽपि पुरुषो मां पुत्र इत्यालिङ्गति।

**राजा –** प्रिये क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तम् यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि।

**शकुन्तला –** (नाममुद्रां दृष्ट्वा) आर्यपुत्र! इदं तेऽङ्गुलीयकम्।

**राजा–** अस्मादङ्गुलीयोपलम्भात्खलु स्मृतिरुपलब्धा।

(इति निष्क्रान्तः)

## शब्दार्थः

| | | | | | |
|---|---|---|---|---|---|
| जृम्भस्व | – | जम्हाई लो | पौरव | – | पुरुवंश का |
| अविनीत | – | उद्दण्ड | अन्वयः | – | कुल |
| संरम्भः | – | उद्वेग, वेग, प्रयास | शकुन्तलावण्यम् | – | पक्षी के सौन्दर्य को |
| औरस | – | स्वयं के | प्रेक्षस्व | – | देखो |
| क्रीडनकम् | – | खिलौना | रक्षाकरण्डकम् | – | रक्षासूत्र / ताबीज |
| उटजे | – | कुटिया में | मणिबन्धे | – | कलाई पर |
| मृत्तिकामयूरः | – | मिट्टी का मोर | मारीचेन | – | मरीचि के पुत्र कश्यप ऋषि के द्वारा |
| डिम्भकेन | – | बालक के द्वारा | परिष्वजते | – | आलिङ्गन करता है। |
| अङ्गुलीयकम् | – | अङ्गूठी | क्रौर्यमपि | – | कठोरता भी |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) ऋषिजनेन बालस्य नाम किं कृतम् ?

(ख) उटजे कस्य मृत्तिकामयूरः तिष्ठति ?

(ग) राजा बालस्य हस्ते किं लक्षणम् अपश्यत् ?

(घ) रक्षाकरण्डकं केन दत्तम् ?

(ङ) एकां वेणीं का धृतवती ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) बालः सिंहशावकं किम् उक्तवान् ?

(ख) भगवता मारीचेन किं नाम औषधिः दत्ता?

(ग) नाममुद्रां दृष्ट्वा शकुन्तलया किम् उक्तम्?

(घ) राज्ञा स्मृतिः कथम् उपलब्धा ?

### (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) औषधेः विषये तापसी राजानं किं कथयति ?

(ख) राजा बालस्य स्पर्शं कृत्वा कीदृशमनुभवति ?

(ग) शकुन्तलां वीक्ष्य राजा किम् अवोचत् ?

### (4) उचितैः शब्दैः रिक्तस्थानपूर्तिं कुरुत –

(क) रे सिंहशावक जृम्भस्व . . . . . . . . . . . . . . ते गणयिष्यामि। (नखान् / दन्तान्)

(ख) वत्स! मुञ्च . . . . . . . . . . . . . .। (बालमृगेन्द्रकम् / क्रीडनकम्)

(ग) रक्षाकरण्डकमस्य . . . . . . . . . . . . . . न दृश्यते। (अनुबन्धे / मणिबन्धे)

| | | | |
|---|---|---|---|
| (घ) | कोऽपि पुरुषः मां . . . . . . . . . . . . . . आलिङ्गति। | | (भ्राता इति / पुत्र इति) |
| (ङ) | आर्यपुत्र इदं ते . . . . . . . . . . . . . .। | | (अङ्गुलीयकम् / वस्त्रम्) |

## (5) युग्ममेलनं कुरुत –

| | (अ) | (आ) |
|---|---|---|
| (क) | चक्रवर्तिलक्षणम् | बालस्य पिता |
| (ख) | शकुन्तला | अङ्गुलीयकम् |
| (ग) | वर्णचित्रितः | बाले |
| (घ) | राजा | बालस्य माता |
| (ङ) | नाम मुद्रितम् | मृत्तिकामयूरः |

## (6) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं न इति लिखत –

| | | |
|---|---|---|
| **यथा –** | **तेजसः बीजं बालः प्रतिभाति।** | **आम्** |
| | **बाले चक्रवर्त्ति लक्षणं नास्ति।** | **न** |
| (क) | बालः सिंहशावकेन सह क्रीडति। | |
| (ख) | राजा बालं न लालयति। | |
| (ग) | राज्ञः बालस्य च आकृतिः समाना वर्तते। | |
| (घ) | अपराजिता औषधिः भगवता कण्वेन दत्ता। | |

## (7) निम्नलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –

**उदाहरणं यथा –**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| **बालः** | **बाल** | **प्रथमा** | **एकवचनम्** |
| दन्तान् | | | |
| ऋषिजनेन | | | |
| तापसीम् | | | |
| शकुन्तलाम् | | | |
| नाममुद्राम् | | | |
| माम् | | | |
| त्वया | | | |
| मम | | | |
| अङ्गुलीयकम् | | | |

## ( ८ ) निम्नलिखितक्रियापदानां धातुं पुरुषं वचनं लकारं च लिखत –

**उदाहरणं यथा –**

| क्रियापदम् | धातुः | पुरुषः | वचनम् | लकारः |
|---|---|---|---|---|
| **हसति** | **हस्** | **प्रथमपुरुषः** | **एकवचनम्** | **लट्लकारः** |
| गणयसि | | | | |
| गृह्णाति | | | | |
| गणयिष्यामि | | | | |
| दास्यामि | | | | |
| दर्शयति | | | | |
| भवन्ति | | | | |
| क्रीडिष्यामि | | | | |
| अस्मि | | | | |
| सन्ति | | | | |

## ( ९ ) निम्नलिखितानां प्रकृतिं प्रत्ययं च पृथक् कुरुत –

**उदाहरणं यथा –**

| पदम् | धातुः | प्रत्ययः |
|---|---|---|
| **भूत्वा** | **भू** | **क्त्वा ( त्वा )** |
| दृष्ट्वा | | |
| उपगम्य | | |
| विलोक्य | | |
| आदातुम् | | |
| प्रविश्य | | |
| क्रीडितुम् | | |
| पठित्वा | | |

## ( 10 ) पाठे आगतान् पञ्च अव्ययशब्दान् अन्विष्य वाक्यप्रयोगं कुरुत –

## योग्यताविस्तारः

- **नाट्यांशस्य सामूहिकम् अभिनयं कुरुत।**
- **कालिदासस्य रचनानां नामानि लिखत।**

❖ ❖ ❖